# Shri Veda Vyasa Stotram 1 Pashandakhandana

# पाषण्डखण्डन श्रीवेदव्यासस्तोत्रम् १

## Document Information

Text title : Shri Veda Vyasa Stotram 1 Pashandakhandana

File name : vedavyAsastotram1pAShaNDakhaNDana.itx

Category : deities_misc, gurudev, vAdirAja

Location : doc_deities_misc

Author : Vadiraja

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# पाषण्डखण्डन श्रीवेदव्यासस्तोत्रम् १

भीष्मेण काम्यकवने धर्मराजं नृपं प्रति ।
सत्यं सत्यमिति श्लोको भुजावुद्धृत्य पीवरौ ॥ १॥

उक्तः किल सभामध्ये कथेयमखिला स्फुटम् ।
शेषधर्माश्चर्यपर्व द्वितीयाध्याय मध्यगा ॥ २॥

अतस्तस्य भुजावेव छेद्यौ यद्यस्ति पौरुषम् ।
व्यासस्तु तां कथां ग्रन्थे निबबन्ध परं सुधीः ॥ ३॥

किं यमः पापिनं हन्यात्किं वा पापस्य साक्षिणः ।
हृता सीता रावणेनेत्युक्ते न हि जटायुषः ॥ ४॥

शिरश्चिच्छेद भगवान् रामो राजीवलोचनः ।
किन्तु भार्यापहर्तारं जघान युधि रावणम् ॥ ५॥

इदं निदर्शनं पश्य माविवेके मनः कृथाः ।
उद्धृत्य शेषधर्मस्थ वाक्यान्यपि च कानिचित् ॥

मन्दानामुपकाराय दर्शयिष्यामि तत्त्वतः ॥ ६॥

युधिष्ठिर उवाच-
पितामह महाप्राज्ञ सर्वशास्त्र विशारद ।
कृष्णे धर्मे च मे भक्तिः यथास्याद्धि तथा वद ॥ ७॥

भीष्म उवाच-
शृणु पाण्डव वक्ष्यामि हरिभक्तिं सुदुर्लभाम् ।
श्रोतॄणां सर्वपापघ्नीं वदतां च युधिष्ठिर ॥ ८॥

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ९॥

वेदशास्त्रात्परं नास्ति न दैवं केशवात्परम् ।
सत्यं वच्मि हितं वच्मि सारं वच्मि पुनः पुनः ॥ १०॥

असारे दग्धसंसारे सारं यद्विष्णु पूजनम् ।
उद्धृत्य स्वभुजौ भीष्मः शशंस किल संसदि ॥ ११॥

एवं च व्यासदेवस्य कोपराधो विचारय ।
अतो मध्वमुनेर्वाक्ये भारतज्ञ शिरोमणे ॥ १२॥

उद्धृतं बाहुयुगलं यथा भवति वैतथा ।
भीष्माचार्य कृतस्योग्र शपथस्य समीरितम् ॥ १३॥

यत्र तद्वै व्यासवचः शृणुतेत्येव योजना ।
तत्तत्कृत्त्यानुवक्ता च शास्त्राचार्योऽहिलस्य च ॥ १४॥

अशेष निगमोद्धर्ता हर्ता दुस्समयस्य च ।
मनस्सङ्कल्प मात्रेण कुरुपाण्डवसेनयोः ॥ १५॥

कर्ता सत्यवती पुत्रो विहर्ता मुनिमण्डले ।
राजसूयस्य चाचार्यः सर्पयागस्य च प्रभुः ॥ १६॥

कस्तस्य भुजयोश्छेत्ता किं वा तच्छेद् कारणम् ।
भ्रममूला ततस्सर्वा कथासीद् व्यासवैरिणाम् ॥ १७॥

रजक द्रोहतो भिक्षोः शूलारोपण वाक्यवत् ।
भ्रामकं तस्य शास्त्रं च यत्रेत्थं समुदीरितम् ॥ १८॥

नारीसङ्गम मत्तोसौ यस्मान्मामवमन्यते ।
योनिलिङ्ग स्वरूपं हि तस्मादस्य भविष्यति ॥ १९॥

इति पाद्मपुराणोक्त भ्रगुशापस्य साहसम् ।
पश्यन्तु पञ्चशीर्षाणि भुजानां तु चतुष्टयम् ॥ २०॥

द्वौपादावुदरंवक्षः कटी चोरू च धूर्जटेः ।
विच्छिद्य तत्क्षणादेव पेतुः किल महीतले ॥ २१॥

शिश्नमात्रं तूर्वरितं तच्च योन्यां विवेशितम् ।
अत्र प्रमाणं शैवानां कण्ठे कण्ठेवलम्बिनी ॥ २२॥

लिङ्गमालैव या नित्यं करे वामे प्रपूज्यते ।
अतः पाद्मोदितकथा शैवानामपि सम्मता ॥ २३॥

हस्तव्वयवती रम्य जटामण्डल मण्डिता ।
पद्मपादा श्यामवर्णा लसत्कृष्णाजिनोज्ज्वला ॥ २४॥

मन्दस्मिता चन्द्रमुखी बिम्बोष्ठी पङ्कजेक्षणा ।
कुन्द कुङ्मलदन्ताभा सान्द्र कुन्तल सङ्कुला ॥ २५॥

कन्दर्पकोटि सदृशी सौन्दर्याम्बुधि मन्दिरा ।
वन्दारूणामभयदा वन्द्यमाना सुरैर्नरैः ॥ २६ ॥

अद्यापि पूज्यते व्यासप्रतिमा ज्ञानदायिनी ।
चित्रकैर्लिख्यते भित्तौ मन्त्रशास्त्रेषु वर्ण्यते ॥ २७॥

अहो व्यास भुजच्छेदमाशासानस्य दुर्मतेः ।
स्वदैव सर्वगात्राणां च्छेदः खेदकरोभवत् ॥ २८॥

तद्वृद्धि मिच्चतो मूलच्छेदोभूत्तव दुर्जन ।
यद्यासाय द्रुह्यतस्ते शिवद्रोहोभवद् ध्रुवः ॥ २९॥

विवाद् परिहाराय कथेयं ग्रथिताखिला ।
यतिना वादिराजेन व्यासकैङ्कर्यकामिना ॥ ३०॥

इति श्रीवादिराजपूज्यचरणविरचितं पाषण्डखण्डन
श्रीव्यासस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Krishnananda Achar

*Shri Veda Vyasa Stotram 1 Pashandakhandana*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*